यस्य वेदश्च वेदी च उत्सन्ना त्रिपौरुषी स वै दुर्ब्राह्मणः” कात्या० श्रौ० ८।२।१६ सूत्रे कर्कः ।

**त्रिप्रश्न** पु० त्रयाणां दिग्देशकालानां प्रश्नः । १दिग्देशकालानां प्रश्ने २तन्मूलके दिगादिनिरूपणे च । तदधिकारेण सि० शि० उक्तं यथा “जगुर्विदोऽदः किल कालतत्त्वं दिग्देशकालावगमोऽत्र यस्मिन् । त्रिप्रश्ननाम्नि प्रचुरोक्तिधाम्नि” । सू० सि० “शिलातलेऽम्बुसंशुद्धे” इत्यादिनोक्त्वा “इति त्रिप्रश्नाधिकारः” इत्युक्तम् “दिग्देशकालानां प्रतिपादनमिदं परिपूर्त्तिमाप्तमित्यर्थः । दिशां साधनं शिलातल इत्यादि नियतं, तत्सम्बन्धेन समकोणयाम्योत्तरशङ्कूनां साधनान्यपि दिगन्तर्गतान्यनियतानि । पलमालम्बाक्षादिसाधनं देशनिरूपणं नियतम् । अपाचरादिसाधननियतम् । कालसाधनं तदच्छायादिसाधनं च कालनिरूपणमिति विवेकः” रङ्गना० ।

**त्रिप्रस्रुत** पु० त्रिषु स्थानेषु प्रस्रुतः मेढ्रकपोलनेत्रेषु त्रिषु स्थानेषु क्षरितमदे मत्तगजे “गजानां तु प्रभिन्नानां त्रिधा प्रस्रवतां मदम्” भा० आ० २२१ अ० । “त्रिप्रस्रुतमदः शुष्मी षष्टिवर्षो मतङ्गराट्” १५१ अ० । “करात् कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः” । पालकाव्ये तु मदप्रस्रावस्य सप्तस्थानत्वोक्तेरिह प्राधान्यात् त्रिस्थानत्वं बोध्यम् ।

**त्रिप्लक्ष** पु० देशभेदे तद्देशविष्टृतिः । “अवभृथमभ्यवयन्ति यमुनां त्रिप्लक्षावहरणं प्रति” कात्या० श्रौ० २४।६।२९ । “यथा त्रिप्लक्षावहरणसार्जव्येन यमुनामवभृथमभ्युपैति तत्र च यमुनां प्राप्य त्रिप्लक्षहरणे देशे त्रिप्लक्षं नाम जनपदं प्राप्य तत्रैव यमुनायामवभृथमभ्युपैति तत्रैव हि देशे दृषद्वती मनुष्येभ्यस्तिरोभवति । बहूदकापि सती तत्रैवान्तर्हिता भवतीत्यर्थः” कर्कः ।

**त्रिफला** स्त्री त्रयाणां फलानां समाहारः अजा० टाप् । “पथ्या विभीतधात्रीणां फलैः स्यात् त्रिफला समा” इत्युक्ते हरीतक्यादित्रये । तद्गुणा भावप्र० उक्ता यथा “फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्त्तिता । त्रिफला कफपित्तघ्नी मेहकुष्ठहरा सरा । चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी” ।

**त्रिफलाघृत** न० त्रिफलानां रसेन युक्तं घृतम् शा० त० । चक्रदत्तोक्ते घृतभेदे तच्च नानाविधं तत्रैवोक्तं यथा “त्रिफलाभृङ्गमहौषधमध्वाज्यच्छागपयसि गोमूत्रे । नागं सप्तनिषिक्तं करोति गरुडोपमञ्चक्षुः” अन्यदपि “त्रिफलाक्वाथकल्काभ्यां सपयस्कं शृतं घृतम् । तिमिराण्यचिराद्धन्ति पीतमेतन्निशामुखे” ।

**त्रिफलादिलौह** न० भैषज्यरत्नावल्युक्ते लौहभेदे यथा “त्रिफला मुस्तकं व्योषं विडङ्गं पुष्करं वचा । चित्रकं मधुकञ्चैव पलांशं श्लक्ष्णचूर्णितम् । अयश्चूर्णपलान्यष्टौ गुग्गुलोस्तावदेव हि । आलोड्य मधुनोपेतं पलद्वादशकेन च । प्रातर्विलिह्य भुञ्जानो जीर्णे तस्मिन् जयेद्रुजः । दुःसाध्यमामवातञ्च पाण्डुरोगं हलीमकम् । जीर्णाग्निसम्भवं शूलं श्वयथुं विषमज्वरम्”

**त्रिफलाद्यघृत** न० चक्रदत्तोक्ते घृतभेदे तदपि लघुमहद्भेदेन द्विविधं तत्र लघु यथा

“फलत्रिकं भीरुकषायसिद्धं कल्केन यष्टीमधुकस्य युक्तम् । सर्पिः समं क्षौद्रचतुर्थभागं हन्यात् त्रिदोषं तिमिरं प्रवृद्धम्” महत् यथा

“त्रिफलाया रसप्रस्थं प्रस्थं भृङ्गरसस्य च । वृषभस्य रसप्रस्थं शतावर्याश्च तत्समम् । अजाक्षीरं गुडूच्याश्च आमलक्यारसन्तथा । प्रस्थं प्रस्थं समाहृत्य सर्वैरभिर्घृतं पचेत् । कल्कः कणा सिता द्राक्षा त्रिफला नीलमुत्पलम् । मधुकं क्षीरकाकोली मधुपर्णी निदिग्धिका । तत्साधुसिद्धं विज्ञाय शुभे भाण्डे निधापयेत् । ऊर्द्ध्वपानमधःपानं मध्यपानञ्च शस्यते । यावन्तो नेत्ररोगास्तान् पानादेवापकर्षति । सरक्ते रक्तदुष्टे च रक्ते चातिस्रुतेऽपि च । नक्तान्ध्ये तिमिरे काचे नीलिकापटलार्बुदे । अभिष्यन्देऽधिमन्थे च पक्ष्मकोपे सुदारुणे । नेत्ररोगेषु सर्वेषु वातपित्तकफेषु च । अदृष्टिं मन्दहृष्टिञ्च कफवातप्रदूषिताम् । स्रवतो वातपित्ताभ्यां सकण्डूयासन्नदूरदृक् । गृध्रदृष्टिकरं सद्यो बलवर्णाग्निवर्द्धनम् । सर्वनेत्रामयं हन्यात्त्रिफलाद्यं महद्घृतम्” ।

**त्रिःफलीकृत** त्रि० त्रिः त्रिवारं फलीकृतः वितुषीकृतः । त्रिधा वितुषीकृते तण्डुलादौ । “दक्षिणोत्तराभ्यां पाणिभ्यां त्रिःफलीकृतांस्तण्डुलांस्त्रिर्देवताभ्यः प्रक्षालयेत्” गोभिलः “त्रिःफलीकृतान् त्रिधा वितुषीकृतान्” सं० त० रघुनन्दनः ।

**त्रिबन्धन** पु० हर्य्यश्वपौत्रे १नृपभेदे । “हर्य्यश्वस्तत्सुतस्तस्मादरुणोऽथ त्रिबन्धनः” भाग० ७।४ । त्रीणि बन्धनानि यस्य । २जाग्रदाद्यवस्थात्रययुक्ते जीवे पु० ।